# नलोपाख्यानम्

16

बृहदश्व उवाच।

हृतराज्ये नले भीमः सभार्ये प्रेष्यतां गते।

द्विजान्प्रस्थापयामास नलदर्शनकाङ्क्षया॥ ३-६५-१॥

संदिदेश च तान्भीमो वसु दत्त्वा च पुष्कलम्।

मृगयध्वं नलं चैव दमयन्तीं च मे सुताम्॥ ३-६५-२॥

अस्मिन्कर्मणि निष्पन्ने विज्ञाते निषधाधिपे।

गवां सहस्रं दास्यामि यो वस्तावानयिष्यति।

अग्रहारं च दास्यामि ग्रामं नगरसंमितम्॥ ३-६५-३॥

agrahāra *m* – царское дарение земли брахманам;

न चेच्छक्याविहानेतुं दमयन्ती नलो ऽपि वा।

ज्ञातमात्रे ऽपि दास्यामि गवां दशशतं धनम्॥ ३-६५-४॥

इत्युक्तास्ते ययुर्हृष्टा ब्राह्मणाः सर्वतोदिशम्।

पुरराष्ट्राणि चिन्वन्तो नैषधं सह भार्यया॥ ३-६५-५॥

ततश्चेदिपुरीं रम्यां सुदेवो नाम वै द्विजः।

विचिन्वानो ऽथ वैदर्भीमपश्यद्राजवेश्मनि।

पुण्याहवाचने राज्ञः सुनन्दासहितां स्थिताम्॥ ३-६५-६॥

puṇyāha *n* - счастливый день;

मन्दप्रख्यायमानेन रूपेणाप्रतिमेन ताम्।

पिनद्धां धूमजालेन प्रभामिव विभावसोः॥ ३-६५-७॥

vibhāvasu - очень блестящий; *m* огонь, солнце;

तां समीक्ष्य विशालाक्षीमधिकं मलिनां कृशाम्।

तर्कयामास भैमीति कारणैरुपपादयन्॥ ३-६५-८॥

सुदेव उवाच।

यथेयं मे पुरा दृष्टा तथारूपेयमङ्गना।

कृतार्थो ऽस्म्यद्य दृष्ट्वेमां लोककान्तामिव श्रियम्॥ ३-६५-९॥

पूर्णचन्द्राननां श्यामां चारुवृत्तपयोधराम्।

कुर्वन्तीं प्रभया देवीं सर्वा वितिमिरा दिशः॥ ३-६५-१०॥

चारुपद्मपलाशाक्षीं मन्मथस्य रतीमिव।

इष्टां सर्वस्य जगतः पूर्णचन्द्रप्रभामिव॥ ३-६५-११॥

विदर्भसरसस्तस्माद्दैवदोषादिवोद्धृताम्।

मलपङ्कानुलिप्ताङ्गीं मृणालीमिव तां भृशम्॥ ३-६५-१२॥

पौर्णमासीमिव निशां राहुग्रस्तनिशाकराम्।

पतिशोकाकुलां दीनां शुष्कस्रोतां नदीमिव॥ ३-६५-१३॥

विध्वस्तपर्णकमलां वित्रासितविहंगमाम्।

हस्तिहस्तपरिक्लिष्टां व्याकुलामिव पद्मिनीम्॥ ३-६५-१४॥

सुकुमारीं सुजाताङ्गीं रत्नगर्भगृहोचिताम्।

दह्यमानामिवोष्णेन मृणालीमचिरोद्धृताम्॥ ३-६५-१५॥

रूपौदार्यगुणोपेतां मण्डनार्हाममण्डिताम्।

चन्द्रलेखामिव नवां व्योम्नि नीलाभ्रसंवृताम्॥ ३-६५-१६॥

कामभोगैः प्रियैर्हीनां हीनां बन्धुजनेन च।

देहं धारयतीं दीनां भर्तृदर्शनकाङ्क्षया॥ ३-६५-१७॥

भर्ता नाम परं नार्या भूषणं भूषणैर्विना।

एषा विरहिता तेन शोभनापि न शोभते॥ ३-६५-१८॥

दुष्करं कुरुते ऽत्यर्थं हीनो यदनया नलः।

धारयत्यात्मनो देहं न शोकेनावसीदति॥ ३-६५-१९॥

इमामसितकेशान्तां शतपत्रायतेक्षणाम्।

सुखार्हां दुःखितां दृष्ट्वा ममापि व्यथते मनः॥ ३-६५-२०॥

कदा नु खलु दुःखस्य पारं यास्यति वै शुभा।

भर्तुः समागमात्साध्वी रोहिणी शशिनो यथा॥ ३-६५-२१॥

अस्या नूनं पुनर्लाभान्नैषधः प्रीतिमेष्यति।

राजा राज्यपरिभ्रष्टः पुनर्लब्ध्वेव मेदिनीम्॥ ३-६५-२२॥

तुल्यशीलवयोयुक्तां तुल्याभिजनसंयुताम्।

नैषधो ऽर्हति वैदर्भीं तं चेयमसितेक्षणा॥ ३-६५-२३॥

युक्तं तस्याप्रमेयस्य वीर्यसत्त्ववतो मया।

समाश्वासयितुं भार्यां पतिदर्शनलालसाम्॥ ३-६५-२४॥

अयमाश्वासयाम्येनां पूर्णचन्द्रनिभाननाम्।

अदृष्टपूर्वां दुःखस्य दुःखार्तां ध्यानतत्पराम्॥ ३-६५-२५॥

बृहदश्व उवाच।

एवं विमृश्य विविधैः कारणैर्लक्षणैश्च ताम्।

उपगम्य ततो भैमीं सुदेवो ब्राह्मणो ऽब्रवीत्॥ ३-६५-२६ ॥

अहं सुदेवो वैदर्भि भ्रातुस्ते दयितः सखा।

भीमस्य वचनाद्राज्ञस्त्वामन्वेष्टुमिहागतः॥ ३-६५-२७॥

कुशली ते पिता राज्ञि जनित्री भ्रातरश्च ते।

आयुष्मन्तौ कुशलिनौ तत्रस्थौ दारकौ च ते।

त्वत्कृते बन्धुवर्गाश्च गतसत्त्वा इवासते॥ ३-६५-२८॥

अभिज्ञाय सुदेवं तु दमयन्ती युधिष्ठिर।

पर्यपृच्छत्ततः सर्वान्क्रमेण सुहृदः स्वकान्॥ ३-६५-२९॥

रुरोद च भृशं राजन्वैदर्भी शोककर्शिता।

दृष्ट्वा सुदेवं सहसा भ्रातुरिष्टं द्विजोत्तमम्॥ ३-६५-३०॥

ततो रुदन्तीं तां दृष्ट्वा सुनन्दा शोककर्शिताम्।

सुदेवेन सहैकान्ते कथयन्तीं च भारत॥ ३-६५-३१॥

जनित्र्यै प्रेषयामास सैरन्ध्री रुदते भृशम्।

ब्राह्मणेन समागम्य तां वेद यदि मन्यसे॥ ३-६५-३२॥

अथ चेदिपतेर्माता राज्ञश्चान्तःपुरात्तदा।

जगाम यत्र सा बाला ब्राह्मणेन सहाभवत्॥ ३-६५-३३॥

ततः सुदेवमानाय्य राजमाता विशां पते।

पप्रच्छ भार्या कस्येयं सुता वा कस्य भामिनी॥ ३-६५-३४॥

कथं च नष्टा ज्ञातिभ्यो भर्तुर्वा वामलोचना।

त्वया च विदिता विप्र कथमेवंगता सती॥ ३-६५-३५॥

एतदिच्छाम्यहं त्वत्तो ज्ञातुं सर्वमशेषतः।

तत्त्वेन हि ममाचक्ष्व पृच्छन्त्या देवरूपिणीम्॥ ३-६५-३६॥

एवमुक्तस्तया राजन्सुदेवो द्विजसत्तमः।

सुखोपविष्ट आचष्ट दमयन्त्या यथातथम्॥ ३-६५-३७॥